# Shatpanchashadvinayakavarnanam

# ષટ્પઞ્ચાશદ્વિનાયકવર્ણનમ્

## Document Information

Text title : Shatpanchashadvinayakavarnanam

File name : ShaTpanchAshadvinAyakavarNanam.itx

Category : ganesha, gaNeshapurANa

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 154 | 2.154 4-24||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# ષટ્પઞ્ચાશદ્વિનાયકવર્ણનમ્

દૂતા ઊચુઃ ।
કથયામઃ સમાસેન વિશ્વેશાવરણે ગતાન્ ॥ ૪॥

ગણેશાન્ ક્રમશો રાજન્ ! શ ૃણુ સર્વભયાપહાન્ ।
દુર્ગા વિનાયકોઽથાર્કભીમચણ્ડીવિનાયકૌ ॥ ૫॥

દેહલીગણપશ્ચાથ તથોદ્દણ્ડવિનાયકઃ ।
પાશપાણિઃ સર્વવિઘ્નહરણોઽથ વિનાયકઃ ॥ ૬॥

પ્રથમાવરણે સિદ્ધસિદ્ધિરૂપો વિનાયકઃ ।
લમ્બોદરઃ કૂટદન્તઃ શાલટઙ્કુવિનાયકઃ ॥ ૭॥

કૂષ્માણ્ડાખ્યશ્ચતુર્થશ્ચ પઞ્ચમો મુણ્ડસંજ્ઞકઃ ।
વિકટદ્વિજસંજ્ઞસ્તુ રાજપુત્રવિનાયકઃ ॥ ૮॥

પ્રણવાખ્યોઽથાપરશ્ચ દ્વિતીયાવરણે સ્થિતાઃ ।
વક્રતુણ્ડ એકદન્તસ્ત્રિમુખશ્ચ વિનાયકઃ ॥ ૯॥

વિઘ્નરાજશ્ચતુર્થોઽથ વરદશ્ચ વિનાયકઃ ।
પઞ્ચાસ્યશ્ચાપરશ્ચાત્ર હેરમ્બશ્ચ વિનાયકઃ ॥ ૧૦॥

મોદકપ્રિય ઇત્યેવ તૃતીયાવરણે સ્થિતાઃ ।
વિનાયકોઽભયપ્રદઃ સિંહતુણ્ડવિનાયકઃ ॥ ૧૧॥

કુણિતાક્ષશ્ચાપરશ્ચ ક્ષિપ્રપ્રસાદસંજ્ઞકઃ ।
ચિન્તામણિરિતિ ખ્યાતો દન્તહસ્તવિનાયકઃ ॥ ૧૨॥

પ્રચણ્ડશ્ચાપ્યપરશ્ચોદ્દણ્ડમુણ્ડવિનાયકઃ ।
ચતુર્થાવરણે જ્ઞેયા અષ્ટાવેતે વિનાયકાઃ ॥ ૧૩॥

સ્થૂલદન્તો દ્વિતીયસ્તુ કલિપ્રિયવિનાયકઃ ।
ચતુર્દન્તો દ્વિતુણ્ડશ્ચ જ્યેષ્ઠો ગજવિનાયકઃ ॥ ૧૪॥

કાલાખ્યશ્ચ તથા જ્ઞેયો નાગેશાખ્યોઽપરોઽપિ ચ ।
પઞ્ચમાવરણે જ્ઞેયા અષ્ટાવેતે વિનાયકાઃ ॥ ૧૫॥

મણિકર્ણવિનાયક આશાસૃષ્ટિવિનાયકૌ ।
યક્ષાખ્યો ગજકર્ણાખ્યશ્ચિત્રઘણ્ટવિનાયકઃ ॥ ૧૬॥

સુમઙ્ગલશ્ચ મિત્રાખ્ય એતે ષષ્ઠે વિનાયકાઃ ।
મોદઃ પ્રમોદઃ સુમુખો દુર્મુખશ્ચ વિનાયકઃ ॥ ૧૭॥

ગણપાખ્યોઽથાપરશ્ચ તથા જ્ઞાનવિનાયકઃ ।
સપ્તમાવરણે જ્ઞેયાસ્તથા દ્વારવિનાયકઃ ॥ ૧૮॥

અવિમુક્તોઽષ્ટમો યત્ર મોક્ષદોઽથ વિનાયકઃ ।
અન્યો ભગીરથાખ્યો હિ હરિશ્ચન્દ્રવિનાયકઃ ॥ ૧૯॥

કપર્દીતિ પરો જ્ઞેયસ્તથા બિન્દુવિનાયકઃ ।
એતેષાં સ્મરણં નિત્યં સર્વકામફલપ્રદમ્ ॥ ૨૦॥

પ્રાતરુત્થાય યશ્ચૈતાન્ પઠતે શુદ્ધમાનસઃ ।
ન તસ્ય વિઘ્ના વિઘ્નં હિ કુર્વન્તિ સર્વકર્મસુ ॥ ૨૧॥

એકૈકનામ્ના રાજેન્દ્ર ! દૂર્વાભિસ્તણ્ડુલૈરપિ ।
તિલૈઃ શમીદલૈશ્ચૈતાન્ પૂજયેદ્ ભક્તિમાન્ નરઃ ॥ ૨૨॥

અસાધ્યં સાધયેત્ કાર્યં સર્વત્ર વિજયી ભવેત્ ।
આયુષ્યં પુષ્ટિમારોગ્યં પ્રાપ્નુયાદ્ધનમુત્તમમ્ ॥ ૨૩॥

ઇતિ ષટ્પઞ્ચાશદ્વિનાયકવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૧૫૪ । ૨.૧૫૪ ૪-૨૪॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 154 . 2.154 4-24..

Fiftysix Vinayaka-s in seven AvaraNa.

Proofread by Preeti Bhandare

*Shatpanchashadvinayakavarnanam*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*